श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनारदाय ब्रह्मप्रोक्तं

# ॥ श्री सुन्दरराजकवचस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री सुन्दरराजकवचस्तोत्रम् ॥

## अथ श्रीसुन्दरराजकवचस्तोत्रप्रारम्भः

वन्दे सुन्दरराजानमिन्दिराभूमिनायकम्।
बृन्दारकगणैर्वन्द्यञ्चिन्तिताभीष्टदायकम् ॥ 1 ॥

सोमच्छन्दविमानस्थं मध्ये तुरगवाहनम्।
मण्डूकवरदं देवं सुन्दरं प्रणतोऽस्म्यहम् ॥ 2 ॥

सुन्दरायतभुजं भजामहे
वृक्षषण्डमयमद्रिमास्थितम्।
यत्र सुप्रथितनू पुरापगा -
तीर्थमर्थितफलप्रदंविदुः ॥ 3 ॥

## अथ श्रीसुन्दरराजकवच महामन्त्रम्

अस्य श्रीसुन्दरराजकवचस्तोत्रमहामन्त्रस्य,
विखनसब्रह्मर्षिः,
अनुष्टुप्च्छन्दः,
श्रीसुन्दरराजो देवता,
ओं बीजम्,
श्रीं शक्तिः,
ह्लीं कीलकम्,
मम सुन्दरराजप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

ओं नमो भगवते श्रीसुन्दरराजाय अङ्गुष्ठाभ्यान्नमः।
ओं नमो भगवते श्रीवृषभाद्रिवासिने तर्जनीभ्यान्नमः।
ओं नमो भगवते देवशिखामणये मध्यमाभ्यान्नमः।
ओं नमो भगवते परमस्वामिने अनामिकाभ्यान्नमः।
ओं नमो भगवते प्रयोगचक्रिणे कनिष्ठिकाभ्यान्नमः।
ओं नमो भगवते सर्वसम्पत्कराय करतलकरपृष्ठाभ्यान्नमः।
ओं नमो भगवते श्रीसुन्दरराजाय हृदयाय नमः।
ओं नमो भगवते श्रीवृषभाद्रिवासिने शिरसे स्वाहा।
ओं नमो भगवते देवशिखामणये शिखायै वषट्।
ओं नमो भगवते श्रीपरमस्वामिने कवचाय हुम्।
ओं नमो भगवते प्रयोगचक्रिणे नेत्रत्रयाय वौषट्।
ओं नमो भगवते सर्वसम्पत्कराय अस्त्राय फट्।
भूर्भुवस्सुवरोमितिदिग्बन्धः॥

**अथ ध्यानम्**

मञ्जीराभ्यां लसत्पादं काञ्च्या राजत्कटीतटम्।
श्रीवत्सहारकेयूरैः कौस्तुभेन विराजितम्॥ 1॥

यज्ञसूत्रञ्च तुळसीमालाधृतभुजान्तरम्।
रत्नकुण्डलशोभाढ्यकर्णद्वन्द्वमनोहरम्॥ 2॥

सर्वलक्षणलक्षिण्यं सुशीर्षमकुटोज्ज्वलम्।
सुन्दरस्य च सौन्दर्यं वन्दे सुन्दरनायकम्॥ 3॥

पीताम्बरं वरदशीतलदृष्टिपातम्
आजानुलम्बिभुजमायतकर्णपाशम्।
श्रीमन् महावनगिरीन्द्रनिवासदीक्षम्
लक्ष्मीधरं किमपि वस्तु ममाऽविरस्तु॥ 4॥

सुन्दरं सुन्दरभुजं परमस्वामिनं हरिम्।
श्रीभूमिनीळारमणं वृषाद्रीशन्नमाम्यहम्॥ 5 ॥

**अथ रक्षाविधिः**

प्राच्यां मे सुन्दरः पातु आग्नेय्यां गरुडध्वजः।
दक्षिणे पातु देवेशो नैर्ऋत्यां पातु विश्वदृक्॥ 1 ॥

वारुण्यां वरदः पातु वायव्यां पातु वामनः।
त्रिविक्रमोत्तरं पातु चैशान्यां पातु केशवः॥ 2 ॥

ऊर्ध्वं मे पातु गोविन्दः हृषीकेशस्तथाह्यधः।
परितः पातु मे शार्ङ्गी चान्तर्नारायणो मम॥ 3 ॥

शेषशायी शिरः पातु फालं भक्तजनप्रियः।
नासां रसाधिपः पातु श्रोत्रौ रात्रिचरान्तकः॥ 4 ॥

दृशौ मे पुण्डरीकाक्षः चिबुकं करुणानिधिः।
दशनान् पातु दैत्यारिः जिह्वां वाचं शिखास्तथा॥ 5 ॥

परमेष्ठी च पात्वोष्ठौ कपोलौ करिरक्षकः।
कण्ठं वैकुण्ठवासी मे वक्षौ वृषगिरीश्वरः॥ 6 ॥

भुजौ मे सुन्दरभुजः पाणी मे पार्थसारथिः।
नखान् पातु महावीरः अमेयात्माऽङ्गुलीर्मम॥ 7 ॥

पक्षीन्द्रवाहनः कक्षौ कुक्षिं त्रैलोक्यरक्षकः।
क्षीराब्धिशायी पार्श्वौ मे पृष्ठं मे कमठीवपुः॥ 8 ॥

नाभिं मे पद्मनाभश्च कटिं कैटभनाशनः।
वनाद्रिनिलयो मध्यमूरू दामोदरो मम॥ 9 ॥

जानुनी जन्महा पातु जङ्घे शङ्खासिपद्मधृत्।
पादौ मे परमस्वामी शुभाङ्गः पातु मेऽङ्गुळीः॥ **10** ॥

पार्ष्णी शतमखस्तोत्री नखरान्मे हिरण्मयः।
माधवः पातु मेऽङ्गानि सर्वदेवशिखामणिः॥ **11** ॥

चर्माण्यस्थीनि रोमाणि मांसानि रुधिराणि च।
अनन्तः पातु मे बाह्यं परितोऽभ्यन्तराणि च॥ **12** ॥

शुद्धात्मा दिवसे बुद्धिं मङ्गलाङ्गो मनो मम।
वाचं वाणीपतिस्तुत्यो प्राणान् सुन्दरवल्लभः॥ **13** ॥

इन्द्रियाणि च सर्वाणि शरीराणि हरिर्मम।
सूर्यात्मा दिवसे पातु सोमात्मा निशि सर्वदा॥ **14** ॥

उभयोस्सन्ध्ययोः पातु चोग्रसिह्मोऽसुरासुहृत्।
वराहः पातु भूमौ मां जले जलचरप्रभुः॥ **15** ॥

विपिने पातु गोपालः शैले दाशरथीषुधृत्।
आस्थाने कामजनकः यात्रादौ मे जनार्दनः॥ **16** ॥

दिक्षु सर्वासु कार्येषु सर्वभूतहिते रतः।
मित्रं पातु श्रियं पातु सौमित्रेरग्रजो मम॥ **17** ॥

भूतराक्षसयक्षेभ्यः क्षुद्रेभ्यः पातु मौसली।
क्षयशूलातिसारेभ्यः कुष्ठेभ्यो भूतमारणः॥ **18** ॥

अपस्मारज्वरादिभ्यः पातु मां भक्तवत्सलः।
शार्ङ्गी गदाधरः पातु चक्री पातु महाबलः॥ **19** ॥

बलध्वंसी च मे पातु जागरे शयने सदा।
इत्याह भगवान् ब्रह्मा नारदाय महात्मने॥ **20** ॥

इदं श्रुत्वा महाप्राज्ञः नारदो मुनिसत्तमः।
स्वशिष्येभ्यश्च सर्वेभ्यो ह्युपदेशं करोति सः॥ 21 ॥

बहवो ऋषयश्चेदं जप्त्वा स्वयफलङ्गताः।
इत्याश्चर्यकरं दिव्यं कवचं यो जपन् सदा॥ 22 ॥

**फलश्रुतिः**

सर्वान् कामानवाप्नोति विष्णुसायुज्यमाप्नुयात्।
सुन्दराख्यस्य कवचं यो वा भूतकळेबरे॥ 23 ॥

न रोगो न भयं क्वापि न भूतप्रेतबाधकः।
न शक्यो बाधितुं लोकैस्सर्वत्र विजयी भवेत्॥ 24 ॥

महारणे सभामध्ये चोरव्याघ्रसमूहके।
यस्स्मरन् सुन्दरभुजं तत्क्षणाज्जयमश्नुते॥ 25 ॥

वज्रेणापि न भिद्यन्ते हरेर्नाममृताऽप्लुताः।
पुत्रार्थी लभते पुत्रान् धर्मार्थी धर्ममश्नुते॥ 26 ॥

कामार्थी काममाप्नोति धनार्थी लभते धनान्।
जयार्थी जयमाप्नोति वश्यार्थी वश्यमाप्नुयात्॥ 27 ॥

न भयं राक्षसेभ्यश्च रोगार्तो मुच्यते रुजः।
रात्रौ च कवचं जप्त्वा दुस्स्वप्नादिन्द्रियस्खलात्॥ 28 ॥

श्रीवश्यं शत्रुवश्यञ्च राजवश्यं मृगादिभिः।
वाक्सिद्धिं कायसिद्धिञ्च मनस्सिद्धिञ्च विन्दति॥ 29 ॥

सप्तकोटिमहामन्त्रं बहुयत्नेन सिद्धिदम्।
सुन्देरशस्य कवचं शीघ्रसिद्धिप्रदं शुभम्॥ 30 ॥

॥ इति श्री सुन्दरराजकवचस्तोत्रं समाप्तम्॥